## वृद्धिनिमित्तस्य च तद्धितस्यारक्तविकारे। (३९/८४०)

न इति वर्तते। वृद्धेर्निमित्तं यस्मिन् स वृद्धिनिमित्तः तद्धितः, स यदि [1]रक्तेऽर्थे विकारे च न विहितः, तदन्तस्य स्त्रीशब्दस्य न पुंवद्भवति। स्रौघ्नीभार्यः। माथुरीभार्यः। स्रौघ्नीपाशा। माथुरीपाशा। स्रौघ्नीयते। माथुरीयते। [2]स्रौघ्नीमानिनी। माथुरीमानिनी। वृद्धिनिमित्तस्य इति किम्? मध्यमभार्यः। तद्धितस्य इति किम्? काण्डलावभार्यः। बहुव्रीहिपरिग्रहः किमर्थः? तावद्भार्यः। यावद्भार्यः। अरक्तविकारे इति किम्? कषायेण रक्ता काषायी, काषायी बृहतिका यस्य स काषायबृहतिकः। लोहस्य बिकारो लौही, [3]लौही ईषा यस्य रथस्य स [4]लौहेषः। [5]खादिरेषः॥

## स्वाङ्गाचेतोऽमानिनि। (४०/८४१)

स्वाङ्गादुत्तरो य [6]ईकारः तदन्तायाः स्त्रियाः न पुंवद् भवति अमानिनि परतः। दीर्घकेशीभार्यः। [7]श्लक्ष्णकेशीभार्यः। दीर्घकेशीपाशा। श्लक्ष्णकेशीपाशा। दीर्घकेशीयते। श्लक्ष्णकेशीयते। स्वाङ्गात् इति किम्? पटुभार्यः। ईतः इति किम्? [8]अकेशभार्यः। अमानिनि इति किम्। दीर्घकेशमानिनी॥

## जातेश्च। (४१/८४२)

जातेश्च स्त्रियाः न पुंवद् भवति अमानिनि परतः। कठीभार्यः। बह्वृचीभार्यः। कठीपाशा। बह्वृचीपाशा। कठीयते। बह्वृचीयते। अमानिनि इत्येव, कठमानिनी। बह्वृचमानिनी। अयं प्रतिषेध औपसङ्ख्यानिकस्य पुंवद्भावस्य नेष्यते। हस्तिनीनां समूहो [9]हास्तिकम्॥

## पुंवत्कर्मधारयजातीयदेशीयेषु। (४२/७४६)

कर्मधारये [10]समासे जातीय देशीय इत्येतयोश्च प्रत्यययोः[11] भाषितपुंस्कादनूङ स्त्रियाः [12]पुंवद् भवति। प्रतिषेधार्थोऽयमारम्भः। 'न कोपधायाः' (६.३.३७/८३८) इत्युक्तम्, तत्रापि भवति। पाचकवृन्दारिका। पाचकजातीया। पाचकदेशीया। 'सञ्ज्ञापूरण्योश्च' (६.३.३८/८३९) इत्युक्तम्, तत्रापि भवति। दत्तवृन्दारिका। दत्तजातीया। [13]दत्तदेशीया। [14]पूरण्याः–पञ्चमवृन्दारिका। पञ्चमजातीया। पञ्चमदेशीया। 'वृद्धिनिमित्तस्य च तद्धितस्यारक्तविकारे' (६.३.३९/८४०) इत्युक्तम्, तत्रापि भवति। [16]स्रौघ्नजातीया। स्रौघ्नदेशीया। 'स्वाङ्गाच्चेतोऽमानिनि' (६.३.४०/८४१) इत्युक्तम्, तत्रापि भवति। श्लक्ष्णमुखवृन्दारिका। श्लक्ष्णमुखजातीया। श्लक्ष्णमुखदेशीया। 'जातेश्च' (६.३.४१/८४२) इत्युक्तम्, तत्रापि भवति। कठवृन्दारिका। कठजातीया। कठदेशीया। भाषितपुंस्कात् इत्येव, खट्वावृन्दारिका। अनूङ इत्येव, ब्रह्मबन्धूवृन्दारिका।

---

1. रक्तार्थे फ. 2. नास्ति फ. 3. लौही नास्ति फ. 4. रथः इत्यधिकम् ब. 5. खादिरेषः नास्ति फ. 6. इकारः फ. 7. श्लक्षणकेशीभार्यः नास्ति ब.क. 8. अविद्यमानाः केशाः यस्याः सा अकेशा, अकेशा भार्या यस्य अकेशभार्यः ब. 9. हस्तिनीकम् क. 10. समासे नास्ति फ. 11. परतः इत्यधिकम् फ. ह. 12. पुंवद्भावः फ. ह. 13. नास्ति फ. 15. पूरण्याः नास्ति ह. 16. स्रौघ्नवृन्दरिका इत्यधिकम् ब. क.